Hariharaputra Puja Vidhi

Puja · Sanskrit

स्वामिये शरणं अय्यप्पा
श्री हरिहरपुत्र पूजाविधानम्

दीपज्योतिः परंब्रह्म दीपज्योतिर्जनार्धन: ।
दीपो हरतु मे पापं दीपज्योतिर्नमोस्तुते ।।

आचमनम् ||
ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ।। केशव । नारायण । माधव । गोविन्द | विष्णो । मधुसूदन | त्रिविक्रम | वामन । श्रीधर । ह्रषीकेश । पद्मनाभ | दामोदर ||

गणपतिध्यानम् ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्बुजम् प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये
प्राणायामः ||
ॐ भूः । ॐ भुवः । ॐ सुवः । ॐ महः । ॐ जन: । ॐ तप: । ॐ सत्यम ॥
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । दियो यो नः प्रचोदयात् ।
ओमापो-ज्योति-रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

सङ्कल्प: ॥
ममोपात्त - समस्त - दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं तदेव लघ्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव श्री लक्ष्मीपतेः तेऽङ्घ्रियुगं स्मरामि ।
करिष्यमाणस्य कर्मण: निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वरपूजां करिष्ये ॥ (अप उपस्पृश्य)

घण्टा पूजा ||

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् । कुरु घण्टारवं तत्र देवताह्वानलाञ्चनम् ॥
घण्टनादं कृत्वा ॥

विघ्नेश्वरपूजा ||

ॐ ग॒णानां त्वा ग॒णप॑ति ं हवामहे क॒विक॑वी॒नाम॑प॒मश्र॑वस्तमम् । ज्ये॒ष्ठ॒राज॑ब्रह्म॒णां ब्रह्मणस्पत॒ आ नः॑ शृण्वन्नू॒तिभि॑स्सीद॒सादं॑न् ॥ ॐ श्री महागणपतये नमः ।।

अस्मिन (बिम्बे / हरिद्राबिम्बे / चित्रपटे) श्रीविघ्नेश्वरं ध्यायामि । आवाहयामि । आसनं समर्पयामि । पादयोः पाद्यं समर्पयामि । हस्तयो: अर्घ्यं समर्पयामि । मुखे शुद्ध आचमनीयं समर्पयामि । मधुपर्कं समर्पयामि | स्नानं समर्पयामि । स्नानानन्तरं आचमनीयं समर्पयामि । वस्त्रं (वस्त्रार्थं अक्षतान) समर्पयामि । उपवीतं (उपवीतार्थं अक्षतान्) समर्पयामि । दिव्य- परिमळ-गन्धान् धारयामि । गन्धस्योपरि हरिद्राचूर्णं धारयामि । अक्षतान् समर्पयामि । पुष्पैः पूजयामि ॥

सुमुखाय नमः । एकदन्ताय नमः । कपिलाय नमः | गजकर्णकाय नमः |
लम्बोदराय नमः । विकटाय नमः । विघ्नराजाय नमः । विनायकाय नमः । धूमकेतवे नमः । गणाध्यक्षाय नमः । फालचन्द्राय नमः । गजाननाय नमः । वक्रतुण्डाय नमः । शूर्पकर्णाय नमः । हेरम्बाय नम: । स्कन्द-पूर्वजाय नमः । अष्टसिद्धिविनायकाय नमः | श्री महागणपतये नमः ॥

धूपमाघ्रापयामि ||

दशाङ्गं गुग्गुलूपेतं सुगन्धं सुमनोहरम् ।
आग्रेयं सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥
श्री महागणपतये नम: धूपमाघ्रापयामि । आचमनीयं समर्पयामि ।

दीपं संदर्शयामि ||

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ॥
श्री महागणपतये नमः दीपं संदर्शयामि । आचमनीयं समर्पयामि ।

नैवेद्यम् ॥

ॐ भूर्भुवस्सुवः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ।
देवसवितप्रसुवा
सत्यं त्वर्तेन परिशिंचियामी (during daytime, before sunset) |
ऋतम त्वा सत्येन परिशिंचियामी (during night-time, after sunset) |
अमृतोपस्तरणमसि ।
ॐ प्राणाय स्वा: । ॐ अपानाय स्वा: । ॐ व्यानाय स्वा: । ॐ उदानाय स्वा: । ॐ समानाय स्वा: । ॐ ब्रह्मणे स्वा: ।

कदलीफलं / नारिकेल कण्डद्वयं (coconut) / काश्मीरफलं (apple) / क्षीरम् (milk) / क्षीरान्नम् (paayasam / kheer) / चित्रान्नम् (tamarind or lemon rice) / कलकंदं (sugar candy) / गूढशकलं (jaggery)

श्री महागणपतये नमः नैवेद्यं समर्पयामि । मध्ये-मध्ये पानीयं समर्पयामि।
हस्तौ-प्रक्षालयामि । पादौ प्रक्षालयामि । मुखे शुध्द - आचमनीयं समर्पयामि। । ।

ताम्बूलं ॥

फूकीफल समायुक्तं नागवल्लीर्दलैर्युतम् । कर्पूरचूर्ण सम्युक्तं तामबूलं प्रतिगृह्यताम् ॥
श्री महागणपतये नमः कर्पूरताम्बूलं समर्पयामि ॥

कर्पूरनीराजनं दर्शयामि ।
ॐ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमो नमः ॥

ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे समेकामांकामकामाय मह्यं कामेश्वरो वैश्रवणो दधातु कुबेराय वैश्रवणाय महाराजाय नमः ॥

श्री महागणपतये नमः कर्पूरनीराजनं समर्पयामि ॥ नीराजनान्तरं आचमनीयं समर्पयामि । रक्षान्धारयामि । समस्तोपचार पूजां समर्पयामि ॥

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥ (नमस्कारः)

महासङ्कल्पः ||
शुभे शोभने मुहूर्ते आद्यब्रह्मणः द्वितीयपरार्धे, श्वेतवराहकल्पे वैवस्वत- मन्वन्तरे, अष्टाविंशतितमे कलियुगे प्रथमे पादे क्रौञ्चद्वीपे रम्यकवर्षे, ऐन्द्रखण्डे, पश्चिमदेशे, शान्तसमुद्रतीरे, कपिलारण्य क्षेत्रे, अस्मिन् वर्तमाने शकाब्दे व्यावहारिके प्रभवादि षष्टि संवत्सराणां मध्ये, _____नाम संवत्सरे _____अयने, _____ऋतौ, _____मासे, _____पक्षे, _____शुभतिथौ, _____वासर: वासरयुक्तायां _____नक्षत्रयुक्तायां शुभयोग-शुभकरण सकलविशेषण - विशिष्टायां मम उपात्त-समस्त दुरितक्षयद्वारा श्रीपरमेस्वरप्रीत्यर्थ, श्री पूरणा पुष्कलांबा समेद हरिहरपुत्र प्रीत्यर्थं,

(गौत्रः, सहकुटुम्बस्य, नक्षत्र, राशि, नाम)

अस्माकं सहकुटुम्बानां क्षेमस्थैर्य वीर्यविजय आयुरारोग्य ऐश्वर्याभिवृद्धयर्थं समस्तमङ्गलावाप्यर्थं समस्तदुरितोपशान्त्यर्थं, धर्मार्थ काममोक्ष चतुर्विध फल पुरुषार्थ सिद्धयर्थं इष्ट काम्यार्थ सिद्धयर्थं भगवत्पाद शरणारविन्दयोः असञ्चल निष्कपट नित्य भक्ति यावच्छक्ति ध्यानावाहनादि - श्री महागणपति प्रसाद सिद्धयर्थं, सपरिवार समेद श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिन् प्रसादेन ज्ञान वैराग्य सिद्धयर्थं सर्वाभीष्ट सिद्धयर्थं सकलरोगपीडा परिहारद्वारा अरोग दृडगावदा सिद्धयर्थं सकलरोग निवृत्यर्थं अपमृत्यु दोष निवारणार्थं मनःशान्ति सिद्धयर्थं ॥

(शबरिगिरीश यात्रया: निर्विघ्नेन सिद्धयर्थं)

श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिन् सहस्रनामार्चन पूजां करिष्ये।

तदनन्तरं नामसङ्कीर्तनं च अष्टोत्तर शतनामार्चन पूजां करिष्ये । (अप उपस्पृश्य)

अगजानन - पद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ||
श्रीविघ्नेश्वराय नमः यथास्थानं प्रतिष्ठापयामि ।
शोभनार्थे क्षेमाय पुनरागमनायच ।

गुरुध्यानम् ||
गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वर: । गुरुः साक्षात्परं ब्रह्मा तस्मै श्री गुरवे नमः ॥

श्री हरिहरपुत्र पूजा ॥
तेजो मण्डल मध्यकं त्रिनयनं दिव्याम्बरालङ्कृतं
देवं पुष्पशरेक्षु चापविलसत्माणिक्य पात्राभयं ।
विब्राणं करपंकजैर्मदगज स्कन्दादिरूढं विपुम्
शास्तारं चरणं नमामि सततं त्रैलोक्य सम्मोहनम् ॥

(गायत्रिमन्त्रः)

ॐ धा॒ता वि॑धा॒ता प॑र॒मोत॑सं॒दृक्प्र॒जाप॑तिः पर॒मे॒ष्ठी वि॒राजा । स्तोमा॒श्छंदा ँसि नि॒विदा॑म आहुरे॒तस्मै॑ रा॒ष्ट्र॒म॒भिसन्न॑मामा ॥ अभ्यावर्तद्ध्वमुपमेतसा॒क म॒यँ शा॒स्ताऽधिपतिर्वो अस्तु । अ॒स्य वि॒ज्ञा॒न॒मनु॒सँरं॑भध्वमि॒मं प॒श्चादनु॑ जीवाथ॒ सर्वे॑ ॥ भूतनाथाय विद्महे भवपुत्राय धीमहि, तन्नः शास्ता प्रचोदयात् ॥

अस्मिन (बिम्बे / दीपे / चित्रपटे)

श्री पूरणा पुष्कला समेद श्री हरिहरपुत्रं ध्यायामि | आवाहयामि ॥

ॐ श्री महाशास्त्रे नमः । रत्नसिम्हासनं समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । पादयोः पाद्यं समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । हस्तयो: अर्घ्यं समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । मुखे शुद्ध आचमनीयं समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । मधुपर्कं समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । स्नानं समर्पयामि ॥

स्नानानन्तरं आचमनीयं समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । वस्त्रं (वस्त्रार्थं अक्षतान) समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । उपवितं (उपवीतार्थं अक्षतान) समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । दिव्य परिमळ - गन्धान् धारयामि ॥

ॐ श्री महाशास्त्रे नमः । गन्धस्योपरि हरिद्राचूर्णं धारयामि ॥

ॐ श्री महाशास्त्रे नमः । अक्षतान् समर्पयामि ॥

ॐ श्री महाशास्त्रे नमः । पुष्पैः पूजयामि ॥

कल्हारोज्वलनीलकुन्तलभरं कालांबुद श्यामलं
कर्पूराकलिताभिराम वपुषं कान्तेन्दुबिंबाननं ।
श्री दण्डांकुश पाशशूल विलसत् पाणि मदान्त-द्विपारूढं
शत्रुविमर्दनं हृदि महा शास्तारं आद्यं भजे ।।

(सहस्रनामार्चना / अष्टोत्तर शतनामार्चना)

धूपमाघ्रापयामि ||

दशाङ्गं गुग्गुलूपेतं सुगन्धं सुमनोहरम् ।
आग्रेयं सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

ॐ श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिने नमः धूपमाघ्रापयामि ।
आचमनीयं समर्पयामि ॥

दीपं दर्शयामि ||

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ॥

ॐ श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिने नमः दीपं दर्शयामि । आचमनीयं समर्पयामि ।

नैवेद्यम् ॥

ॐ भूर्भु -वस्सुवः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो-योनः प्रचोदयात् ॥
सत्यं त्वर्तेन परिशिंचियामी (during day-time, before sunset) I
ऋतम त्वा सत्येन परिशिंचियामी (during night-time, after sunset) ।
अमृतोपस्तरणमसि ।
ॐ प्राणाय स्वा: । ॐ अपानाय स्वा: । ॐ व्यानाय स्वा: । ॐ उदानाय स्वा: । ॐ समानाय स्वा: । ॐ ब्रह्मणे स्वा: ।
श्री पूर्णा पुष्कलांबा समेद सान्गाय सायुधाय सपरिवाराय सर्वात्मकाय श्री हरिहरपुत्र स्वामिने नमो नमः

नारिकेलं (coconut) / कदलीफलं (banana)/ काश्मीरफलं (apple)/ क्षीरम् (milk)/ क्षीरान्नम् (paayasam/ kheer)/ चित्रान्नम् (tamarind or lemon rice) / कलकंदं (sugar candy) / गूढशकलं (jaggery) / घृतगुलपायसं / नारिकेळ क्षीरपायसं / लड्डुकं / माषापूपं / कुळापूपं / मोदकं ।

एतत्सर्वं यथाशक्ति महानैवेद्यं समर्पयामि । मध्ये-मध्ये
अमृतपानीयं समर्पयामि । हस्तौ-प्रक्षालयामि । पादौ-प्रक्षालयामि । मुखे
शुध्द-आचमनीयं निवेदयामि ॥

ताम्बूलं ॥

फूकीफल समायुक्तं नागवल्लीर्दलैर्युतम् ।
कर्पूरचूर्ण सम्युक्तं तामबूलं प्रतिगृह्यताम् ॥
ॐ श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिने नम: कर्पूरताम्बूलं समर्पयामि ।।
कर्पूरनीराजनं दर्शयामि ||

ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे समेकामांकामकामाय मा
कामेश्वरो वैश्रवणो दधातु कुबेराय वैश्रवणाय महाराजाय नमः ॥
ॐ श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिने नमः कर्पूरनीराजनं समर्पयामि ।
राजनान्तरं आचमनीयं समर्पयामि । रक्षान्धारयामि ।

मन्त्रपुष्पम् ॥

योंऽपां पुष्पवेंदं पुष्पंवान् प्रजावान् पशुमान् भंवति । चन्द्रमा वा अपां पुष्पम् । पुष्पंवान्
प्रजावान् पशुमान् भंवति । य एवं वेँदं । यो पामायतनं वेद । आयतनवान् भवति ॥
ॐ॥ तद्ब्रह्म । ॐ||
तद्द्वायुः । ॐ॥
तदात्मा ।
ॐ|| तथ्सत्यम् । ॐ|| तत्सर्वम् । ॐ
तत्पुरोर्नमः ॥
अन्तश्चरति भूतेषु गुहायां-विश्वमूर्तिषु । त्वं-यँज्ञस्त्वं-वँषट्कारस्त्व-मिन्द्रस्त्वं
रुद्रस्त्वं-विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः ।
त्वं तंदाप आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।
ॐ श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिने नमः वेदोक्त मन्त्रपुष्पं सुवर्णपुष्पं
समर्पयामि ।

नमस्कारः ॥

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे ॥

प्रकृष्ट पापनाशाय प्रकृष्ट फलसिद्धये । प्रदक्षिणं करोमित्वा प्रसीद परमेश्वर / पुरुषोत्तम ॥

अन्यता शरणं नास्ति त्वमेव शरणं मम | तस्माद्कारुण्य भावेन रक्ष रक्ष शबरीश्वरा ॥

ॐ श्री पूर्णा पुष्कलांबा समेद श्री हरिहरपुत्र स्वामिने नमः अनेककोटि नमस्कारान् समर्पयामि ॥

समस्तोपचार-पूजां समर्पयामि ॥